दाह्वयागंधतैलभाविनीव सप्तलानवमालिका १ माध्यंकुंदे १ रक्तकस्तुबंधूको
बंधुजीवकः २ सहाकुमारीतरणिः २ अम्लानस्तुमहासहा १ तत्रशोणेकुरबकः
तत्रपीतेकुरंटकः १ नीलाझिंटीद्वयोर्बाणादासीचार्तगलश्चसा ५ सैरेयकस्तु

अ
को
२२

22

ण्टी स्यात् १ तस्मिन्कुरबकोऽरुणे १ पीते कुरण्टको झिण्टी १ तस्मिन्सहचरी द्वयोः १ ओड्रपुष्पं जपा-
वज्रपुष्पं पुष्पं तिलस्य यत् प्रतिहासशतप्रासचण्डातहयमारकाः करवीरे ५ करीरे क्र-
करग्रन्थिलावुभौ २ उन्मत्तः कितवो धूर्तो धत्तूरः कनकाह्वयः मातुलो मदनश्चास्य फ-
ले मातुलपुत्रकः १ फलपूरो बीजपूरो २ रुचको मातुलुङ्गके ४ समीरणो मरुवकः प्र-
स्थपुष्पः फणिज्जकः जम्बीरोऽपि ५ अथ पर्णासे कठिञ्जरकुठेरकौ ३ सितेऽर्जकोऽत्र १ पाठी
तु चित्रको वह्निसंज्ञकः २ अर्काह्ववसुकास्फोटगणरूपविकीरणाः मन्दारश्चार्कपर्णो-
ऽत्र शुक्लेऽलर्कप्रतापसौ २ शिवमल्ली पाशुपत एकाष्ठीलो बुको वसुः ५ वन्दा वृक्षादनी
वृक्षरुहा जीवन्तिकेत्यपि ४ वत्सादनी छिन्नरुहा गुडूची तन्त्रिकामृता जीवन्तिका सोम-
वल्ली विशल्या मधुपर्ण्यपि मूर्वा देवी मधुरसा मोरटा तेजनी स्रवा मधूलिका मधुश्रेणी
गोकर्णी पीलुपर्ण्यपि ९ पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसा एकाष्ठीला पाप-
चेली प्राचीना वनतिक्तिका ८ कटुः कटम्भराशोकरोहिणी कटुरोहिणी मत्स्यपित्ता
कृष्णभेदी चक्राङ्गी शकुलादनी आत्मगुप्ताजहाव्यण्डा कण्डूरा प्रावृषायणी ऋष्यप्रोक्ता

कशिम्बिः कपिकच्छुश्च मर्कटी ४ चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा प्रत्यक्श्रे
णी सुतश्रेणी रण्डा मूषिकपर्ण्यपि ४ अपामार्गः शैखरिकः धामार्गवमयूरकौ प्रत्य
क्पर्णी केशपर्णी किणिही खरमञ्जरी ९ हञ्जिका ब्राह्मणी पद्मा भार्गी ब्राह्मणयष्टि
का अङ्गारवल्ली बालेयशाकबर्बरवर्धकाः ४ ब्रह्मरीतिर्मत्स्याक्षका भार्गी च ब्राह्म
णी मता मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका मण्डूकपर्णी भण्डीरी भण्डी योजनव
ल्लिका ९२ यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः रोदनी कच्छुरानन्ता समुद्रा
न्ता दुरालभा ९ पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्ण्यपि क्रोष्टुविन्ना सिंहपुच्छी क
लशिर्धावनिर्गुहा ४ निदिग्धिका स्पृशी व्याघ्री बृहती कण्टकारिका प्रचोदनी कुली
क्षुद्रा दुःस्पर्शा राष्ट्रिकेत्यपि ९ नीली काला क्लीतनिकिका ग्रामीणा मधुपर्णिका रञ्ज
नी श्रीफली तुत्था द्रोणी दोला च नीलिनी ११ अवल्गुजः सोमराजी सुवल्लिः सोमवल्लि
का कालमेषी कृष्णफला वाकुची पूतिफल्यपि ९ कणोषणोपकुल्या स्याद्वैदेही मागधी चप
ला कणा ऊषणा पिप्पली शौण्डी कोला ९ अथ करिपिप्पली कपिवल्ली कोलवल्ली श्रे

अ
को
२२
23

घसीवस्मिः प्रमात ५ वचांतववविका १ काकचिंचीगुंजेतुकृष्णला वक्मिकाव पलं
कषात्विक्षुगंधाश्वदंष्ट्रास्वादुकंटका गोकंटकोगोक्षुरकोवनशृंगाटइत्यपि २ विषा
विषाप्रतिविषातिविषोपविषाकणा शृंगीमहौषधंच ८ श्वेताक्षीरावीदुग्धिकासमे २ श
तमूलीबहुसुताभीरुरिंदीवरीवरी ऋष्यप्रोक्ताभीरुपत्रीनारायण्यःशतावरीअहेरुः
अथपीतद्रुकालीयकहरिद्रवः दार्वीपचंपचादारुहरिद्रापर्जनीत्यपि २ वचोग्रगंधा
षड्ग्रंथागोलोमीशतपर्विका ५ शुक्लाहैमवती १ वैद्यमातृसिंह्यौतुवाशिका वृषो
टरूषःसिंहास्योवासकोवाजिदंतकः ८ आस्फोटागिरिकर्णीस्याद्विष्णुक्रांतापरा
जिता ४ इक्षुगंधातुकांडेक्षुकोकिलाक्षेक्षुवालिकाः ५ शालेयःस्याच्छीतशिवश्छ
त्रामधुरिकामिसिः मिश्रेयापि ८ अथसीहुंडोवज्रद्रुः स्नुक्स्नुहीगुडासमंतदुग्धा ८ अ
थोवेल्लममोघाचित्रतंडुलाश्चकृमिघ्नश्चविडंगः पुंनपुंसकम ८ बलावाट्यालकाः २
घंटारवातुशणपुष्पिका १ मृद्वीकागोस्तनीद्राक्षास्वाद्वीमधुरसेतिच ५ हारहूरा
च सर्वानुभूतिःसरलात्रिपुटात्रिवृतात्रिवृत त्रिभंडीरोचनी २ श्यामापालिंद्यौतुसुषे

नगुल्म

२२

णिका कालामसूरविदलार्धचंद्राकालमेषिका ९ मधुकं क्लीतकंयष्टीमधुकंमधुय
ष्टिका ४ विदारीक्षीरशुक्लेक्षुगंधा २ क्रोष्ट्रीतयासिता १ अन्याक्षीरविदारीस्यान्महाश्वे
तर्क्षगंधिका २ लांगलीशारदीतोयपिप्पलीशकुलादनी ४ खराश्वाकारवीदीप्योमयू
रोलोचमस्तकः ५ गोपीश्यामाशारिवास्यादनंतोत्पलशारिवा ५ योग्यमृद्धिःसिद्धि
लक्ष्म्यौवृद्धेरप्याह्वयाइमे ४ कदलीवारणबुसारंभामोचांशुमत्फलाकाष्ठीला ९ मुद्ग
पर्णीतुकाकमुद्गासहेत्यपि २ वार्ताकीहिंगुलीसिंहीभंटाकीदुष्प्रधर्षिणी ५ नाकुली
सुरसानागसुगंधागंधनाकुली नकुलेष्टाभुजंगाक्षीछत्राकीसुवहाचसा ८ विदारि
गंधांशुमतीसालपर्णीस्थिराध्रुवा ५ तुंडिकेरीसमुद्रांताकर्पासीबदरेतिच ४ भारद्वा
जीतुसावन्या १ शृंगीतुऋषभोवृषः २ गांगेरुकीनागबलाझषाह्रस्वगवेधुका ४ धा
मार्गवोघोषकःस्यात् २ महाजालीसपीतकः १ ज्योत्स्नीपटोलिकाजाली २ नादेयी
भूमिजंबुका १ स्याल्लांगलिक्यग्निशिखा १ काकांगीकाकनासिका १ गोधापदीतुसु
वहा १ मुसलीतालमूलिका अजशृंगीविषाणीस्यात् १ गोजिह्वादार्विकेसमे २ तांबू

अ
को
२५

लवल्लीतांबूलीनागवल्ल्यपि ३ अथद्विजाहरेणूरेणुकाकौंतीकपिलाभस्मगंधिनी ६ एला
वालुकमैलेयंसुगंधिहरिवालुकम् वालुकंच ५ अथपालंक्यांमुकुंदःकुंदकुंदुरु ४ बालं
ह्रीबेरबर्हिष्ठोदीच्यंकेशांबुनामच ६ कालानुसार्यवृद्धाश्मपुष्पशीतशिवानितुशैलेयं
तालपर्णीतुदैत्यागंधकुटीमुरागंधिनी ५ गजभक्ष्यातुसुवहासुरभीरसा महेरणाकुंदुरु
कीसल्लकीह्लादिनीतिच ८ अग्निज्वालासुभिक्षेतुधातकीधातुपुष्पिका ४ पृथ्वीकाचं
द्रवालैलानिष्कुटिर्बहुला ५ अथसासूक्ष्मोपकुंचिकातुत्थाकोरंगीत्रिपुटात्रुटिः ५ व्याधि
कुष्ठंपारिभाव्यंवाप्यंपाकलमुत्पलं ६ शंखिनीचोरपुष्पीस्यात्केशिनी ३ अथवितुन्नकः
झटामलाज्झटातालीशिवातामलकीतिच ७ प्रपौंडरीकंपौंडर्यं २ अथतुन्नःकुबेरकः
कुणिःकच्छःकांतलकोनंदिवृक्षः ६ अथराक्षसीचंडाधनहरीक्षेमदुष्पत्रगणहासकाः
व्याडायुधंव्याघ्रनखंकरजंचक्रकारकम् ४ सुषिराविद्रुमलताकपोतांघ्रिर्नटीनली
धमन्यंजनकेशीचहनुर्हट्टविलासिनी ४ शुक्तिःशंखःखुरःकोलदलंनखम् ५ अ
थाढकीकांक्षीमृत्स्नातुवरिकामृत्तालकसुराष्ट्रजे ६ कुटन्नटंदाशपुरंवानेयंपरिपे।

२५

लवं प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च । ग्रंथिपर्णं शुकं बर्हं पुष्पं स्थौणेयकुक्कुरे ।
मरुन्माला तु पिशुना स्पृक्का देवीलता लघुः समुद्रान्ता वधूः कोटिवर्षा लंकोपिकेत्यपि ॥
तपस्विनी जटामांसी जटिला लोमशा मिसी । त्वक्पत्रमुत्कटं भृंगं त्वचं चोचं वरांगकम् । क
र्चूरको द्राविडकः काल्पको वेधमुख्यकः । ओषध्यो जातिमात्रे स्युरजातौ सर्वमौषधम्
शाकाख्यं पत्रपुष्पादि । तंडुलीयोऽल्पमारिषः । विशल्याग्निशिखानंता फलिनी शक्रपुष्प्य
पि । स्यादृक्षगंधा छगलान्त्र्यावेगी वृद्धदारकः जुंगः । ब्राह्मी तु मत्स्याक्षी वयःस्था सोमवल्ल
री । पटुपर्णी हैमवती स्वर्णक्षीरी हिमावती । हयपुच्छी तु कांबोजी माषपर्णी महासहा
तुंडिकेरी रक्तफला बिंबिका पीलुपर्ण्यपि । बर्बरा कबरी तुंगी खरपुष्पाजगंधिका ।
एलापर्णी सुवहा रास्ना युक्त[रसा]फला च सा । चांगेरी चुक्रिका दंतशठाम्बष्ठाम्ललोणिका
सहस्रवेधी चुक्रोऽम्लवेतसः शतवेध्यपि । नमस्कारी गंडकाली समंगा खदिरेत्यपि ।
जीवंती जीवनी जीवा जीवनीया मधुस्रवा । कूर्चशीर्षो मधुरकः शृंगह्रस्वांगजीवकाः ।
किराततिक्तो भूनिंबोऽनार्यतिक्तः । अथ सप्तला विमला सातला भूरिफेना चर्मकषेत्यपि

अ
को
२५

25

संस्पर्शाथ शटी गंधमूला षड्ग्रंथिकेत्यपि कर्चूरोपि पलाशोथ कारवेल्लः कठिल्लकः सुषवी
चाथ कुलकं पटोलस्तिक्तकः पटुः कूष्मांडकस्तु कर्कारुरुर्वारुः कर्कटी स्त्रियाम् वाय
सोली स्वादुरसा वयस्था २ अथ मकूलकः निकुंभो दंतिका प्रत्यक्श्रेण्युदुंबरपर्ण्यपि ५
अजमोदा तूग्रगंधा ब्रह्मदर्भा यवानिका ४ मूले पौष्करकाश्मीरपद्मपत्राणि पौष्करे २ अ
व्यथातिचरा पद्मा चारटी पद्मचारिणी ५ कांपिल्यः कर्कशश्चंद्रो रक्तांगो रोचनीत्यपि ५
प्रपुन्नाडस्त्वेडगजो दद्रुघ्नश्चक्रमर्दकः पद्माट उरणाख्यश्च ९ पलांडुस्तु सुकंदकः २ लता
र्कदुद्रुमौ तत्र हरिते २ अथ महौषधम् लशुनं गृंजनारिष्टमहाकंदरसोनकाः ९ पुनर्न
वा तु शोफघ्नी २ वितुन्नं सुनिषण्णकम् २ स्याद्वातकः शीतलोपराजिता शणपर्ण्यपि ४
पारावतांघ्रिः कटभी पण्या ज्योतिष्मती लता ५ वार्षिकं त्रायमाणा स्यात् त्रायंती बलभद्रि
का ४ विष्वक्सेनप्रिया गृष्टिर्वाराही बदरेत्यपि ४ मार्कवो भृंगराजः स्यात् २ काकमाची
तु वायसी २ शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा मिसिः अवाक्पुष्पी कारवी च २ सरणा तु
प्रसारणी २ तस्यां कटंभरा राजबला भद्रबलेति च २ जनी जतूका जननी जतुकृच्चक्रव

तिनीसंस्पर्शा ९ अथशाटींगंथम्लीषट्रंग्रंथिकेत्यपि २ कर्बुरोपिपलाशोपि २ कारवे

ल्लः करिलभः सुघवीव २ अथफलकंपरोलस्तिककः पटुः ५ कूष्मांडकल्लकको

कः २ पलाकः कर्कटीस्त्रियो इर्वारुःकट्वंवीस्पात २ नम्पूलानूकमेसमे २ विशाग

वातीमोतनम्वा १ विषमलाद्रिइवारुणी २ अथगोन्नःसुरुणःकंदः १ गंडीरोलासमष्ठिला

कालेयपोटका २ अथीनम्लकंदिलमोचिका १ वास्तुकं १ शाकभेदाःस्युः ५ इत्यौ

त्पत्तपर्विकामहत्सवीर्याभागंध्योरुहालेता ६ अथसामिलागोलोमीषातवीर्योचवं

उलीशफलात्तकः ५ फलविंदोमेचनामाम्लामूलकमस्त्रियां ५ स्याद्रुदम्लको

गुंडा २ कुडलावकलोमरा १ वषोनकनावकमोरत्नविसारतणधजः शातपर्वाथव

कलोवेणमक्षवनेजनः १० केचकावेणवस्नेसर्येत्ववंनमलिलोद्रला १ ग्रंथिनोपर्व

पत्सपी २ ग्रंदस्तेजनकःशरः २ नडस्तथमनःपोटगलः २ अथोकाशमस्त्रियाम इ

त्वगंधःपोटगलः २ कुंभूमनित्वचलमाः इक्षालकाः २ नडेराः ग्रंद्रकांनवकारपः

स्पाद्वीरणंवीरतवं १ मूलेस्पोशीरमस्त्रियाम अभयंनलदंसेव्यममृणालजलाशयम

अ
को
२९

लामज्जकं लघुलयमवदाहेष्टकापथे नलादयस्तृणं गर्मुच्छ्यामाकप्रमुखा अपि अस्त्री
कुशं कुथो दर्भः पवित्रं ४ अथ कत्तृणं पौरं सौगंधिकं ध्यामदेवजग्धकरौहिषम् ६ छत्राति
छत्रपालघ्नौ २ मालातृणकभूस्तृणे ४ शष्पं बालतृणं २ घासो यवसं २ तृणमर्जुनं ४
तृणानां संहतिस्तृण्या १ नड्या नलसंहतिः १ तृणराजाह्वयस्तालः २ नारिकेलस्तु लां
गली २ घोंटा तु पूगः क्रमुको गुवाकः खपुरः ५ अस्य तु फलमुद्वेगमेते च हिंतालसहिता
स्त्रयः खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः इत्यमरकोशे द्वितीयकांडे वनौषधिव
र्गः वनवर्गः ॥ ॐ सिंहो मृगेंद्रः पंचास्यो हर्यक्षः केसरी हरिः ६ कंठीरवश्च शार्दूलद्वीपिनौ
व्याघ्रे ३ चित्रकायः पंचनखश्च तरक्षुस्तु मृगादनः २ वृकश्च वराहः सूकरो घृष्टिः को
लः पोत्री किरिः किटिः दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि १२ कलालोमुखाद्रोम
लांगूलश्च कपिप्लवंगप्लवगशाखामृगवलीमुखाः मर्कटो वानरः कीशो वनौ
काः ९ हरिः कृष्णमुखो गोलांगूलश्च ऋक्षभल्लुके ऋक्षाच्छभल्लभल्लूकाः ४ भाल्लुकश्च
गंडके खड्गखड्गिनौ २ कुलीरश्च लुलायो महिषो वाहद्विषत्कासरसैरिभाः ५ रजस्वलो

पि स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्त्तकाः शृगालोवंचकः क्रोष्टुफेरुफेरवजंबु
काः ९ ओतुर्विडालो मार्जारो वृषदंशक आखुभुक ५ त्रयोगौधेरगौधेयगो
धारागोधिकात्मजे श्वावित्तु शल्यः तल्लोम्नि शललीशललंशलम् २ वातप्रमीर्वातमृ
गः २ कोकस्त्वीहामृगोवृकः ३ मृगाः कुरंगवातायुहरिणाजिनयोनयः ५ ऐणेयमे
ण्याश्चर्मादौ १ एणस्यैणमुभेत्रिषु कदलीकंदलीचीनचमूरुप्रियकावपि समूरुश्चे
तिहरिणाश्चमीप्यजिनयोनयः ९ कृष्णसाररुरुन्यंकुरंकुशंबररौहिषाः गोकर्णपृ
षतैणर्ष्यरोहिताश्चमरोमृगाः ११ गंधर्वः शरभो रामः सृमरो गवयः शशः ९ इत्याद
योमृगेंद्राद्या गवाद्याः पशुजातयः उंदुरुर्मूषकोप्याखुः ३ छिक्कनकोग्रहगोधागोधा
लोटोह?श्च छुच्छुंदरीगंधमूषीदीर्घदेहीतुमूषिका ४ गिरिकाबालमूषिका १ क
टकश्च सरटः कृकलासः स्यात् ३ प्रतिसूर्यशयानकश्च मुसलीगृहगोधिका २ लू
तास्त्रीतंतुवायोर्णनाभमर्कटकाः समाः ४ नालिकोजालकारश्च नीलंगुस्तुक्रिमिः
कर्णजलौकाः शतपद्युभे २ वृश्चिकः शूककीटः स्यात् २ अलिद्रोणौतुवृश्चिके २ पा

अ
को
२२
23

रावतः कलरवः कपोतः ३ अथ शशादनः पत्री श्येनः २ उलूके तु वायसारातिपेचकौ ३ घू
को निशाटश्च व्याघ्राटः स्याद्भरद्वाजः १ खंजरीटस्तु खंजनः २ लोहपृष्ठस्तु कंकः स्यात् २
अथ चाषः किकीदिविः २ कलिंगभृंगधूम्याटाः ३ अथ स्यात् शतपत्रकः दार्वाघाटः २ अ
थ सारंगस्तोककश्चातकः समाः ३ कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ४ स्त्री
त्वीकालतश्च चटकः कलविंकः स्यात् २ तस्य स्त्री चटका १ तयोः पुमपत्ये चाटकैरः १
स्त्र्यपत्ये चटकैव हि १ कर्करेटुः करेटुः स्यात् २ कृकणक्रकरौ समौ २ वनप्रियः परभृत
कोकिलः पिक इत्यपि ४ कलकंठस्ताम्राक्षश्च काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः
ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपि ९ एकदृष्टिश्चिरंजीवी मौकलिर्द्विजः [illegible]
द्रोणकाकस्तु काकोलः २ दात्यूहः कालकंठकः २ आतापिचिल्लौ २ दाक्षाय्यगृध्रौ २ की
रशुकौ समौ २ शिखंडशालो विलीनो गोटीचेनेच्चाश्च क्रुङ् क्रौंचः २ अथ बकः कह्वः २
पुष्कराह्वस्तु सारसः २ कोकश्चक्रश्चक्रवाको रथांगाह्वयनामकः ४ कादम्बः कलहं
सः स्यात् २ उत्क्रोशकुररौ समौ २ हंसास्तु श्वेतगरुतश्चक्रांगा मानसौकसः ४ राजहंसा

२२

स्त्वनेचंचुचरणैर्लोहितैः सिताः १ मलिनैर्मल्लिकाक्षास्ते १ धार्तराष्ट्राः सितेतरैः १ शरा
रिराटिराडिश्च ३ बलाकाबिसकंठिका १ शारिकागोवटीपीनवोगाव हंसस्ययो
षिद्वरटा १ सारसस्यतुलक्ष्मणा १ जतुकाजिनपत्रास्यात् २ परोष्णीतैलपायिका २ म
त्तविंशावल्यालिकानिषाटनीव वर्वणामक्षिकानीला २ सरघामधुमक्षिका २ पतंगि
कापुत्तिकास्यात् २ दंशस्तुवनमक्षिका दंशीतज्जातिरल्पास्यात् १ गंधोलीवरटाद्वयोः
भृंगारीचीरुकाचीरीझिल्लिकाचसमाइमाः ४ समौपतंगशलभौ २ खद्योतोज्योति
रिंगणः २ इंद्रगोपकः ज्योतिर्मालीकीटमणिश्च मधुव्रतोमधुकरोमधुलिण्मधुपालि
नः द्विरेफपुष्पलिड्भृंगषट्पदभ्रमरालयः भसलश्चंचरीकश्चरोलम्बेंदिंदिरावपि
मयूरोबर्हिणोबर्हीनीलकंठोभुजंगभुक् शिखावलः शिखीकेकीमेघनादानुला
स्यपि ९ केकावाणीमयूरस्य १ समौचंद्रकमेचकौ २ शिखाचूडा २ शिखंडस्तुपिच्छब
र्हेनपुंसके २ प्रचलाकः कलापश्च खगोविहंगविहगविहंगमविहायसः शकुंतप
क्षिशकुनिशकुंतिशकुनद्विजाः पतत्रिपत्रिपतगपतत्पत्ररथांडजाः नगौकोवाजिवि

अ
को
२८
98

किरविविष्किरपतत्रयः नीडोद्भवागरुत्मन्तः पित्सन्तोनभसंगमाः २ तेषांविशेषाहारी
तोमद्गुःकारंडवःप्लवः तित्तिरिःकुक्कुभोलावोजीवंजीवश्चकोरकः कोयष्टिकष्टि
ट्टिभकोवर्तकोवर्तिकादयः २ ग्राहिताघातिकादयः गरुत्पत्त्रच्छदः पत्रंपतत्रंचतनूरु
हम् १ स्त्रीपक्षतिःपक्षमूले २ चंचुस्त्रोटिरुभेस्त्रियौ २ तेडुंच प्रडीनोड्डीनसंडीनान्येताः
खगगतिक्रियाः २ पेशीकोशोद्विहीनेंडे १ कुलायोनीडमस्त्रियाम् २ पोतःपाकोर्भ
कोडिंभः पृथुकःशावकःशिशुः २ स्त्रीपुंसौमिथुनं १ द्वंद्वंयुग्मंतुयुगलंयुगं ४ समूह
निवहव्यूहसंदोहविसरव्रजाः स्तोमौघनिकरव्रातवारसंघातसंचयाः समुदायःस
मुदयःसमवायश्चयोगणः स्त्रियांतुसंहतिर्वृंदंनिकुरंबंकदंबकम् १९ वृंदभेदाः
समैर्वर्गः १ संघसार्थौतुजंतुभिः १ सजातीयैःकुलं १ यूथंतिरश्चांपुंनपुंसकम् १ पशू
नांसमजः १ अन्येषांसमाजः १ अथसधर्मिणांस्यान्निकायः पुंजराशीतूत्करःकूटम
स्त्रियाम् ४ कापोतशौकमायूरतैत्तिरादीनितद्गणे ४ गृहासक्ताःपक्षिमृगाश्छेका
स्तेगृह्यकाश्चते इत्यमरकोशेद्वितीयकांडेसिंहादिवर्गःपंचमः ५ ओंमनुष्यामानु

जामर्त्या मानुषा मानवा नराः ९ स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नरः ५ स्त्रीयो
षिदबला नारी योषा सीमंतिनी वधूः प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ वि
शेषास्त्वंगना भीरुः कामिनी वामलोचना प्रमदा मानिनी कांता ललना च नितंबिनी
सुंदरी रमणी रामा ॥ कोपना सैव भामिनी । वरारोहा मत्तकाशिन्युत्तमा वरवर्णि
नी ॥ कृताभिषेका महिषी । भोगिन्योन्या नृपस्त्रियः । पत्नी पाणिगृहीती च । द्विती
या सहधर्मिणी भार्या जाया थ पुंभूम्नि दाराः स्यात्तु कुटुंबिनी पुरंध्री । सुचरि
त्रा तु सती साध्वी पतिव्रता ॥ कृतसापत्निकाध्यूढाधिविन्ना । थ स्वयंवरा पतिंवरा
च वर्या च । कुलस्त्री कुलपालिका । कन्या कुमारी । गौरी तु नग्निकानागतार्तवा । स्या
न्मध्यमा दृष्टरजाः । तरुणी युवतिः समे । समाः स्नुषा जनी वध्वः । वधूटी च चिरिंटी तु
सुवासिनी । इच्छावती कामुका स्यात् । वृषस्यंती तु कामुकी । कांतार्थिनी तु या याति
संकेतं साभिसारिका । पुंश्चली धर्षणी बंधक्यसती कुलटेत्वरी स्वैरिणी पांसुला च स्या
त् । अशिश्वी शिशुना विना । अवीरा निष्पतिसुता । विश्वस्ता विधवे समे । आलिः स

अ
को
२५

29

लीवयस्याथ २ सध्रीच पतिवत्नी सभर्तृका १ वृद्धा पलिक्नी १ प्राज्ञी तु प्रज्ञा १ प्राज्ञा तु धीम
ती १ शूद्री शूद्रस्य भार्या स्यात् १ शूद्रा तज्जातिरेव च १ आभीरी तु महाशूद्री जातिपुंयोगयोः
समाः १ अर्याणी स्वयमर्या स्यात् १ क्षत्रिया क्षत्रियाण्यपि १ उपाध्यायाप्युपाध्यायी १ स्या
दाचार्यापि च स्वतः १ आचार्यानी तु पुंयोगे १ स्यादर्यी क्षत्रियी तथा १ पोटा स्त्री पुंसलक्षणा

उपाध्यान्युपाध्यायीः

वीरपत्नी वीरभार्या १ वीरमाता तु वीरसूः १ जीवसूर्जीवतोका कृन्तोरा च कुटवादिनी
जातापत्या प्रजाता च प्रसूता च प्रसूतिका ४ स्त्री नग्निका कोटवी स्यात् १ दूती संचारिके
समे १ कात्यायन्यर्धवृद्धा या काषायवसनाधवा १ सैरंध्री परवेश्मस्था १ स्ववशा शिल्पका
रिका १ असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी १ वारस्त्री गणिका वेश्या रूपाजीवा
पण्यस्त्री पण्यस्त्रीव अथ सा जनैः सत्कृता वारमुख्या स्यात् १ कुट्टनी शंभली समे १ विप्र
श्निका त्वीक्षणिका दैवज्ञा १ अथ रजस्वला स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्पवत्यपि
ऋतुमत्युदक्यापि १ स्याद्रजः पुष्पमार्तवम् २ श्रद्धालुर्दोहदवती १ निष्क
ला विगतार्तवा १ आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी ४ गणिकादेस्तु गाणिक्यं

माभिगो योवर्तगामी २ पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः १ स तु द्विजोऽग्रेदिधि-
षुः सैव यस्य कुटुम्बिनी १ कानीनः कन्यकाजातः सुतः १ सुभगासुतः सौभागिने-
यः स्यात् २ पारस्त्रैणेयस्तु परस्त्रियाः १ पैतृष्वसेयः स्यात्पैतृष्वस्रीयः पितृष्वसुः सुतः २
मातृष्वसुश्चैवं १ वैमात्रेयो विमातृजः २ साम्मातरस्तु भयमर्मात्मकः अथ बान्धकिनेयः स्या-
द्बन्धुलश्चासतीसुतः कौलटेयः कौलटेरः ५ भिक्षुकी तु सती यदि तदा कौलटिनेयः
स्यात् कौलटेयोऽपि चात्मजः २ आत्मजस्तनयः सूनुः सुतः पुत्रः ५ दारकदायादौ च स्त्रियां त्व-
मी आहुर्दुहितरं सर्वे ५ अपत्यं तोकं तयोः समे संततिः संतानः प्रजा... स्वजाते त्वौर-
सोरस्यौ २ तातस्तु जनकः पिता २ अम्बा च जनयित्री प्रसूर्माता जननी २ भगिनी स्वसा २
ननान्दा तु स्वसा पत्युः १ नप्त्री पौत्री सुतात्मजा २ भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्
प्रजावती भ्रातृजाया १ मातुलानी तु मातुली २ पतिपत्न्योः प्रसूः श्वश्रूः १ श्वशुरस्तु पि-
ता तयोः १ पितुर्भ्राता पितृव्यः स्यात् १ मातुर्भ्राता तु मातुलः १ श्यालाः स्युर्भ्रातरः पत्न्याः
स्वामिनो देवृदेवरौ १ स्वस्रीयो भागिनेयः स्यात् २ जामाता दुहितुः पतिः १ पितामहः १

पितुःपिता १ तत्पिताप्रपितामहः १ मातुर्मातामहाद्येवं १ सपिंडास्तुसनाभयः २ समानोद

र्य्यसोदर्य्यसगर्भ्यसहजाः समाः ४ सगोत्रबांधवज्ञातिबंधुस्वस्वजनाः समाः ५ ज्ञातेयंबं

धुतातेषांक्रमाद्भावसमूहयोः २ धवःप्रियःपतिर्भर्त्तासेक्तावरयितावरः २ आयंप्रजः

पितयोनात्मे १ जारस्तूपपतिःसमौ २ अमृतेजारजःकुंडः १ मृतेभर्त्तरिगोलकः १ भ्रात्री

योभ्रातृजः २ भ्रातृभगिन्यौभ्रातराव्वभौ २ गत्यंतलोपेगावौ स्याद्दक्षजंघोसमर्थतः

स्याद्वैविंशतीर्त्रिंशतः स्वैरकोग्रलोपतः हेकयोः क्लीवपेकेस्यात्स्टूनिपदूनीपटू

स्वदादीनामग्रयोगापेक्षोनतोचनेतिश्च श्वकामिस्यादिकेत्वेषांस्वैर्यागोषवशेषत्नः मा

तापितरौपितरौमात र पितरौप्रसू ... जनयितारौ ४ श्वश्रूश्वशुरौश्वशुरौ २ पुत्रौपुत्र

श्चदुहितारौ दंपतीजंपतीभार्यापतीजायापतीति च ४ गर्भोभ्रूणइमौतुल्यौ स्त्रीभर्भ्यःस्त्री

ह्वंकललोभ्रियाम ४ सूतिमासोवैजननः २ गर्भाशयोजरायुः स्यादुल्बंच

हुंडवःक्लीवःपंडोनपुंसकं ५ शंडःषंडोपोनिर्माणो पंडःपंडुश्वेतिच शिशुत्वंशैशवंबाल्यं

ताहृष्यंयौवनेसमे २ स्यात्स्थाविरंवृद्धत्वं १ वृद्धसंघेपिवार्द्धकं १ पलितंजरसाशौक्ल्यंकेशा ३

डे: १ विस्रसा जरा २ स्यादुत्तानशया डिम्भाः स्तनपा च स्तनन्धयः ४ बालस्तु स्यान्माणवक :
वयःस्थस्तरुणो युवा २ प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन् ६ वर्षीयान्दशमी ज्या
यान् २ पूर्वजस्त्वग्रियोऽग्रजः २ जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ५ अमां
सो दुर्बलश्छातः २ बलवान्मांसलोंऽसलः २ तुंदिभस्तुंदिलस्तुंदी बृहत्कुक्षिः पिचंडिलः ५
उदरिलस्तु अवटीटोऽवनाटश्चावभ्राटो नतनासिके २ केशवः केशिकः केशी २ वलिनो
वलिभः समौ २ विकलाङ्गस्त्वपोगंडः २ खर्वो ह्रस्वश्च वामनः २ निखर्वः खरणस्तु खर
णाः स्यात्खरणसो २ विग्रस्तु गतनासिकः २ खुरणाः स्यात्खुरणसः २ खरणाः खरना
सिकः प्रज्ञुः प्रगतजानुकः २ ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात् २ संज्ञुः संहतजानुकः २ स्यादेडे ब
धिरः २ कुब्जे गडुलः २ कुकरे कुणिः २ पृश्निरल्पतनौ २ श्रोणः पंगौ २ मुंडस्तु मुंडिते २ क
लेवकस्त्ववाकक्करणः १ खलतिः खल्वाटलामिकः २ वलिरः केकरे २ खोडे खंजः २ विनग्नस्तु
विगुञ्जरावराः जडुलः कालकः पिप्लुः २ तिलकस्तिलकालकः अनामयं स्यादारोग्यम्
चिकित्सा रुक्प्रतिक्रिया २ भेषजौषधभैषज्यान्यगदो जायुरित्यपि ५ स्त्री रुग्रुजा चोपता

अ
को
३१

31

रोगव्याधिगदामयाः ७ यक्ष्मात्मात्ययः शोषः ३ प्रतिश्यायस्तु पीनसः २ स्त्रीक्षुत्क्षुतं
क्षवः पुंसि ३ कासस्तु क्षवथुः पुमान् २ शोफस्तु श्वयथुः शोथः ३ पादस्फोटो विपादिका
किलासं सिध्म २ कच्छ्वां तु पामपामा विचर्चिका ४ कण्डूः खर्जूश्च कण्डूया ३ विस्फोटः पिटकः स्त्रि
यां २ व्रणोऽस्त्रियामीर्ममरुः क्लीबे नाडीव्रणः पुमान् ४ कोठो मण्डलकं २ कुष्ठश्वित्रे २ दुर्नाम
कार्शसी २ गुदजं गुदकीलकं च आनाहस्तु विबन्धः स्यात् २ ग्रहणी रुक्प्रवाहिका २ प्रच्छर्दि
का वमिश्च स्त्री पुमांस्तु वमथुः समाः ३ छर्दिश्छर्दिश्च व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगं
दराः ५ श्लीपदं पादवल्मीकं स्यात् २ [illegible] रोगहार्यगदंकारो भिषग्वैद्यौ चिकि
त्सके ५ वार्तो निरामयः कल्य ३ उल्लाघो निर्गतो गदात् १ ग्लानग्लास्नू आमयावी विकृतो
व्याधितोऽपटुः आतुरोऽभ्यमितोऽभ्यान्तः ९ समौ पामनकच्छुरौ २ दद्रुणो दद्रुरोगी स्यात् २ अ
र्शोरोगयुतोऽर्शसः २ वातकी वातरोगी स्यात् २ सातिसारोऽतिसारकी २ स्युः क्लिन्नाक्षे चु
ल्लचिल्लपिल्लाः ४ क्लिन्नेऽक्ष्णि चाप्यमी ४ उन्मत्त उन्मादवति २ श्लेष्मणः श्लेष्मलः कफी ३
न्युब्जो भुग्ने रुजा २ कुब्जः [illegible] वृद्धनाभौ तुन्दिलतुन्दिभौ २ किलासी सिध्मलः २ अन्धः अदृक् २ ३१

मृद्वोलेमृतं मृद्विलौ २ शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ९ मायुः पित्तं २ कफः श्ले

ष्मा २ स्त्रियां तु त्वगसृग्धरा २ पिशितं तरसं मांसं पललं क्रव्यमामिषम् ९ उत्तप्तं शुष्कमां

सं स्यात्तद्वल्लूरं त्रिलिङ्गकम् २ रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितम् २ बुक्काग्र

मांसं २ हृदयं हृत् २ मेदस्तु वपा वसा २ पश्चाद्ग्रीवाशिरा मन्या १ नाडी तु धमनिः शिरा

तिलकं क्लोम २ मस्तिष्कं गोर्दं २ किट्टं मलोऽस्त्रियाम् २ अन्त्रं पुरीतत् २ गुल्मस्तु प्लीहा पुंसि

अथ वस्नसा स्नायुः स्त्रियां २ कालखण्डयकृती तु समे इमे २ सृणिका स्यन्दिनी लाला २ दू

षिका नेत्रयोर्मलम् १ तूष्णीका च मूत्रं प्रस्रावः २ उच्चारावस्करौ शमलं शकृत् पुरीषं गूथ

वर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ ४ स्यात्कर्परः कपालोऽस्त्री २ कीकसं कुल्यमस्थि च २ स्यात्

शरीरास्थ्नि कङ्कालः १ कंकस्य पृष्ठास्थ्नि तु कशेरुका १ शिरोऽस्थनि करोटिः स्त्री १ पार

र्श्व पार्श्वास्थनि तु पञ्जरः १ पञ्जूव अंगं प्रतीकोऽवयवोऽपघनः ४ अथ कलेवरं गात्रं वपुः

संहननं शरीरं वर्ष्म विग्रहः कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः १२ पादाग्रं प्रपदं २

पादः पदंघ्रिश्चरणोऽस्त्रियाम् ४ तद्ग्रन्थी घुटिके गुल्फौ २ पुमान्पार्ष्णिस्तयोरधः १ जंघा तु

पृष्ठन्ता १ जानूरूपर्वाष्ठीवदस्त्रियाम् २ सक्थि क्लीबे पुमानूरुः १ तत्सन्धिः पुंसि वंक्षणः १ गुदं त्व
पानं पायुर्ना २ वस्तिर्नाभेरधो द्वयोः १ कटो ना श्रोणिफलकं १ कटिः श्रोणिः ककुद्मती २ क
टेश्च पश्चान्नितम्बः स्त्रीकट्याः १ क्लीबे तु जघनं पुरः १ कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे
स्त्रियां स्फिचौ कटिप्रोथौ १ उपस्थो वक्ष्यमाणयोः १ भगो योनिर्द्वयोः २ स्त्रीचिह्नं स्मर
गृहं च शिश्नो मेढ्रो मेहनशेफसी ४ शेपः साधनं च मुष्कोऽण्डकोशो वृषणः २ पेलं च छछ
वृषणाण्डे त्रिकं १ पिचण्डकुक्षी जठरोदरं तुन्दम् ५ तुंदिभ स्तनौ कुचौ २ चूचुकं तु कुचाग्रं स्यात्
न ना क्रोडं भुजान्तरम् उरो वत्सं च वक्षश्च ५ पृष्ठं तु चरमं तनोः १ स्कन्धो भुजशिरोंऽसोऽस्त्री २ सं
धी तस्यैव जत्रुणी १ बाहुमूले उभे कक्षौ २ पार्श्वमस्त्री तयोरधः १ मध्यमं चावलग्नं च मध्यो
ऽस्त्री २ द्वौ परौ द्वयोः भुजबाहू प्रवेष्टो दोः स्यात् ४ कफोणिस्तु कूर्परः २ अस्योपरि प्रगण्डः १
स्यात् १ प्रकोष्ठस्तस्य चाप्यधः १ मणिबन्धादाकनिष्ठं करस्य करभो बहिः १ पंचशाखः
शयः पाणिः २ हस्तः करश्च तर्जनी स्यात्प्रदेशिनी १ अङ्गुल्यः करशाखाः स्युः २ पुंस्यङ्गुष्ठः
प्रदेशिनी मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् ५ पञ्चभिः करहोनस्त्वो

3

स्त्रीनखरोस्त्रियाम् ४ काशांकुष्ठोपि प्रादेशतालगोकर्णास्तर्जन्यादियुते तते अंगुष्ठे
सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः १ पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ १ द्वौ सं
हतौ संहततलप्रतलौ वामदक्षिणौ १ पाणिर्निकुब्जः प्रसृतिस्तौ युतावंजलिः पुमान् १
प्रकोष्ठे विस्तृतकरे हस्तः १ मुष्ट्या तु बद्धया सरत्निः स्यात् १ अरत्निस्तु निष्कनिष्ठेन मुष्टि
ना १ व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् १ ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरु
षं त्रिषु १ कंठो गलः १ अथ ग्रीवायां शिरोधिः कंधरेत्यपि १ कंबुग्रीवा त्रिरेखा सा १ अवटु
र्घाटा कृकाटिका १ वक्त्रास्ये वदनं तुंडमाननं लपनं मुखम् १ क्लीबे घ्राणं गंधवहा घो
णा नासा च नासिका ५ ऊस्यांशाविनीव ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ४ अ
धस्ताच्चिबुकं १ गंडौ कपोलौ १ तत्परो हनुः १ रदना दशना दंता रदाः ४ तालु तु काकुदम्
रसज्ञा रसना जिह्वा १ लोलाघंटिका बालघंटिका च प्रांतावोष्ठस्य सृक्किणी १ ललाट
मलिकं गोधिः २ ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियाम् १ कूर्चमस्त्री भ्रुवोर्मध्यं १ तारकाक्ष्णः क
नीनिका १ लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी दृग्दृष्टी च १ अश्रु नेत्रांबु रोदनं चास्रम

अ
को
३३
33

श्रुच ४ वाष्पश्च अपांगौ नेत्रयोरंतौ १ कटाक्षोपांगदर्शने १ कर्णशब्दग्रहौ श्रोत्रं श्रुति :
स्त्री श्रवणं श्रवः ६ उत्तमांगं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् ५ चिकुरः कुं-
तलो वालः कचः केशः शिरोरुहः ६ तद्वृन्दे कैशिकं कैश्यं २ अलकाश्चूर्ण-
कुंतलाः २ ते ललाटे भ्रमरकाः १ काकपक्षः शिखंडकः २ कबरी केशवेशः १
अथ धम्मिल्लाः संयताः कचाः १ शिखा चूडा केशपाशी ३ व्रतिनस्तु सटा जटाः १ कटंबेव
वेणिप्रवेणी २ शीर्षण्यशिरस्यौ विशदे कचे ४ पाशः पक्षश्च हस्तश्च कलापार्थाः कचा-
त्परे ३ तनूरुहं रोम लोम ३ तद्वृद्धौ श्मश्रु पुंमुखे १ आकल्पवेषौ नेपथ्यं प्रतिकर्म प्र-
साधनम् ५ दशैते त्रिष्वलंकर्तालंकरिष्णुश्च मंडितः २ प्रसाधितोलंकृतश्च भूषितश्च
परिष्कृतः ४ विभ्राड् भ्राजिष्णुरोचिष्णू ३ भूषणं स्यादलंक्रिया २ अलंकारस्त्वाभरणं
परिष्कारो विभूषणम् मंडनं च ५ अथ मुकुटं किरीटं पुंनपुंसकम् २ मौलिश्च चूडा-
मणिः शिरोरत्नं २ तरलो हारमध्यगः १ वालपाश्या पारितथ्या २ पत्रपा-
श्यं ललाटिका २ कर्णिका तालपत्रं स्यात् २ कुंडलं कर्णवेष्टनम् २ कंठलंच ग्रैवेयकं

३३

नं

कंठभूषा २ लंबनंस्याल्ललंतिका २ स्वर्णैः प्रालंबिका २ अथोरः सूत्रिकामौक्तिकैः कृ
ता १ हारोमुक्तावली २ देवछंदोसौशतयष्टिकाः १ हारभेदायष्टिभेदाद्गुछगुछार्धगो
स्तनाः २ अर्धहारोमाणवकः १ एकावल्येकयष्टिका २ सैवनक्षत्रमालास्यात्सप्तविं
शतिमौक्तिका १ आवापकः पारिहार्यः कटकोवलयोस्त्रियाम् ४ केयूरमंगदंदो
र्भूषा २ अंगुलीयकमूर्मिका १ साक्षरांगुलिमुद्रास्या १ कंकणंकरभूषणम् १ स्त्रीक
ट्यांमेखलाकांचीसप्तकीरशनाः स्त्रियाम् ४ सिंजिनीकलापश्च क्लीबेसारसनं १
उभयोर्नीवि चाथपुंस्कट्यांशृंखलंत्रिषु १ पादांगदंतुलाकोटिर्मंजीरोनूपुरोस्त्रियां
हंसकः पादकटकः ४ किंकिणीक्षुद्रघंटिका १ त्वक्फलकृमिरोमाणिवस्त्रयो
निर्दशत्रिषु वाल्कंक्षौमादि १ फालंतुकार्पासंबादरंचतत् कौशेयंकृमिको
शोत्थंरांकवंमृगरोमजम् अनाहतंनिष्प्रवाणितंत्रकंचनवांबरे ४ तत्स्यादुद्गमनी
यंधौतयोर्वस्त्रयोर्युगम् १ पत्रोर्णंधौतकौशेयं १ बहुमूल्यंमहाधनम् २ क्षौमंदुकू
लंस्यात् २ द्वेतुनिवीतंप्रावृतंत्रिषु १ स्त्रियांबहुत्वेवस्त्रस्यदशाः स्युर्वस्तयोर्द्वयोः २ द्वे

अ
को
३५

चोलः कूर्पासकोऽस्त्रि
याम् ४

34

र्घ्यमानाहस्त्वायामः २ परिणाहो विशालता २ विस्तारश्च पटच्चरं जीर्णवस्त्रं २ समौ न
क्तककर्पटौ २ वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ६ चीनं च सुचेलकः पटोऽस्त्री २
ना वराशिः स्थूलशाटकः २ अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके ४ द्वौ प्रावारोत्तरा
संगौ समौ बृहतिका तथा संव्यानमुत्तरीयं च ५ निचोलः प्रच्छदपटः २ समौ रल्लकक
म्बलौ २ चोलः कूर्पासकोऽस्त्रियाम् २ नीशारस्तु प्रावरणो हिमानिलनिवारणे १ अर्धोरु
के वरस्त्रीणां स्याच्चण्डातकमंशुकम् १ स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् १ अ
स्त्री वितानमुल्लोचः २ दूष्याद्यं वस्त्रवेश्मनि १ आयघाह्वान्पटकुटीगुणलयिनी स्यान्नेव
प्रतिसीरा जवनिका स्यात्तिरस्करिणीति च २ परिकर्माङ्गसंस्कारः २ स्यान्मार्ष्टिर्मार्ज
ना मृजा २ पर्यङ्किका परिकरः पर्यङ्कश्चावसक्थिका उद्वर्तनोत्सादने द्वे क्लीबे २ आ
प्लावस्त्वाप्लवः स्नानं २ मज्जनं च चर्चा तु चार्चिक्यं स्थासकः २ अथ प्रबोधनं त्वनुबोध :
पत्रलेखा पत्राङ्गुलिरिमे स्त्रियाम् २ तमालपत्रतिलकचित्रकाणि विशेषकम् ४ द्वि
तीयं च तुरीयं च नास्त्रियाम् अथ कुङ्कुमं काश्मीरजन्माग्निशिखं वरं बाह्लीकपी ३५

नेरक्तसंकोचपिशुनंधीरंलोहितचंदनं ९ तुद्रुणंच लाक्षाराक्षाजतुक्लीवेयावोल
क्तोद्रुमामयः ९ लवंगंदेवकुसुमंश्रीसंज्ञं २ अथजायकंकालीयकंचकालानुसार्यं
च २ अथसमर्थकंवंशिकागुरुराजार्हंलोहंकृमिजंजोंगकम् कालागुर्वगुरु
स्यात् २ मंगल्यामल्लिगंधियत् १ यक्षधूपःसर्जरसोरालसर्वरसावपिबहुरूपोपि ५ वृ
कधूपकृत्रिमधूपकौ तुरुष्कःपिंडकःसिल्होयावनोपि ४ अथपायसश्रीवा
सोवृकधूपोपिश्रीवेष्टसरलद्रवौ ५ मृगनाभिर्मृगमदःकस्तूरीच २ अथकोलकंक
क्कोलकंकोशफलं २ अथकर्पूरमस्त्रियाम् घनसारश्चंद्रसंज्ञःसिताभ्रोहिमवाल
का ५ गंधसारोमलयजोभद्रश्रीश्चंदनोस्त्रियाम् ४ तैलपर्णिकगोशीर्षेहरिचंदनम
स्त्रियां २ श्रीखंडंच तिलपर्णीतुपत्रांगंरंजनंरक्तचंदनंकुचंदनंच ५ अथजातीको
शजातीफलेसमे २ कर्पूरागुरुकस्तूरीकक्कोलैर्यक्षकर्दमः १ गात्रानुलेपनीवर्ति
र्वर्णकंस्याद्विलेपनं २ चूर्णानिवासयोगाःस्युः २ भावितंवासितंत्रिषु २ संस्कारो
गंधमाल्याद्यैर्यःस्यात्तदधिवासनम् १ माल्यंमालास्रजौमूर्ध्नि १ केशमध्येतुगर्भकः

अ
को
२५

35

प्रभ्रष्टकंशिखालंबि १ पुरोन्यस्तंललामकम् १ प्रालंबमृज्वलंबिस्यात्कंठात् १ वै

कक्षिकंतत्त् यत्तिर्यक्क्षिप्तमुरसि १ शिखास्वापीडशेखरौ १ उत्तंसश्च रचनास्या

त्परिस्यंदः २ आभोगः परिपूर्णता २ उपधानंतूपबर्हः २ शय्यायांशयनीयकंशयनं

तल्पिकाच मंचपर्यंकपल्यंकाः खट्वयासमाः ४ गेंडुकः कंदुकं २ दीप्ताशिखिरिप्रदी

पः प्रदीपः २ पीठमासनम् २ समुद्गकः संपुटकः २ प्रतिग्राहः पतद्ग्रहः २ प्रसाधनीकं

कतिका २ पिष्टातः पटवासकः २ दर्पणेमुकुरादर्शौ २ व्यजनंतालवृंत

कम् इत्यमरकोशेद्वितीयकांडेनृवर्गः षष्ठः ६ ॐ संततिर्गोत्रजननकुलान्यभि

जनान्वयौ वंशोन्ववायः संतानः ९ वर्णाः स्युर्ब्राह्मणादयः १ विप्रक्षत्रियविट्शूद्राः

चातुर्वर्ण्यमितिस्मृतं १ राजबीजीराजवंश्यः २ बीज्यस्तुकुलसंभवः २ महाकुलकुली

नार्यसभ्यसज्जनसाधवः ६ ब्रह्मस्नायनः प्रष्ठ्यपूज्यश्च ब्रह्मचारीगृहीवानप्रस्थोभिक्षुः

चतुष्टये आश्रमोस्त्री १ द्विजात्यग्रजन्मभूदेववाडवाः विप्रश्चब्राह्मणः ६ असौषट्

कर्मायागादिभिर्वृतः १ विद्वान्विपश्चिद्दोषज्ञः संख्यावान्पंडितः कविः धीमान्सूरिः

२
२५

सन्सुधीः कोविदोबुधः धीरोमनीषीज्ञः प्राज्ञः

कृती कृष्टिर्लब्धवर्णो विचक्षणः दूरदर्शी दीर्घदर्शी ११ श्रोत्रियश्छांदसः समौ २ उ
पाध्यायोऽध्यापकः अथ स्यान्निषेकादिकृद्गुरुः १ मंत्रव्याख्याकृदाचार्यः १ आदेष्टा
त्वध्वरे व्रती यष्टा च यजमानः २ स सोमवति दीक्षितः १ इज्याशीलो यायजूकः २
यज्वा तु विधिनेष्टवान् १ स गीष्पतीष्ट्या स्थपतिः १ सोमपीथी तु सोमपाः २ सर्ववेदाः
स येनेष्टः क्रतुः सर्वस्वदक्षिणः १ अनूचानः प्रवचने सांगेऽधीती १ गुरोस्तु यो लब्धानु
ज्ञः समावृत्तः १ सुत्वा त्वभिषवे कृते १ छात्रांतेवासिनौ शिष्ये २ शैक्षाः प्राथमकल्पि
काः १ एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः १ सतीर्थ्यास्त्वेकगुरवः १ चितवान
ग्निमग्निचित् १ पारंपर्योपदेशे स्यादैतिह्यमितिहाव्ययम् १ मीमांसको जैमिनीये
वेदांती ब्रह्मवादिनि वैशेषिकः स्यादौलूकः १ सौगतः शून्यवादिनि १ नैयायिक
स्त्वक्षपादः १ स्यात्स्याद्वादिक आर्हतः १ चार्वाकलौकायतिकौ २ सत्कार्ये सांख्यका
पिलौ १ उपज्ञा ज्ञानमाद्यं स्यात् १ ज्ञात्वारंभ उपक्रमः १ यज्ञः सवोऽध्वरो यागः सप्तत
न्तुर्मखः क्रतुः १ पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः एते पंच महायज्ञा ब्रह्म

अ
को
३९
36

यज्ञादिनामकाः ५ समज्यापरिषद्गोष्ठीसभासमितिसंसदः ६ आस्थानी क्लीबमास्थानं स्त्री
नपुंसकयोः सदः ४ प्राग्वंशः प्राग्हविर्गेहात् १ सदस्या विधिदर्शिनः २ सभासदः सभा
स्ताराः सभ्याः सामाजिकाश्च ते ४ पार्षद्याः पारिषद्याः पूर्वाश्च अध्वर्य्युद्गातृहोतारो यजुः
सामर्ग्विदः क्रमात् ३ आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते १ वेदिः परिष्कृता
भूमिः १ समे स्थंडिलचत्वरे २ चषालो यूपकटकः १ कुंबा सुगहना वृतिः १ यूपाग्रे तर्म १
निर्मथ्यदारुण्यरणिर्द्वयोः १ दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ३ अग्नित्रयमि
दं त्रेता १ प्रणीतः संस्कृतोऽनलः समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ३ यो गार्ह
पत्यादानीय दक्षिणाग्निः प्रणीयते तस्मिन्नानाय्यः १ अग्नायी स्वाहा च हुतभुक्प्रिया
ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने १ गायत्रीप्रमुखं छन्दो १ हव्यपाके चरुः पु
मान् १ आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः १ धवित्रं व्यजनं तद्यद्रचितं मृगच
र्मणा १ पृषदाज्यं सदध्याज्ये १ परमान्नं तु पायसम् १ हव्यकव्ये दैवपित्र्ये अन्ने १ पात्रं स्रु
वादिकं १ ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ३ उपाकृतः पशुरसौ योऽभिमंत्र्य क्रतौ १

तौ हतः। परम्पराकं शमनं प्रोक्षणं च वधो वधः॥ वाच्यलिङ्गाः प्रमीतोपसंपन्नप्रोक्षिता हू

ते। सान्नाय्यं हविः। अग्नौ तु हुतं त्रिषु वषट्कृतम्। दीक्षान्तोऽवभृथो यज्ञे। तत्कर्मार्हं तु य

ज्ञियं त्रिषु। अथ क्रतुकर्मेष्टं। पूर्तं खातादिकर्म यत्। अमृतं विघसो यज्ञशेषभोजनशेष

योः॥ त्यागो विहापितं दानमुत्सर्जनविसर्जने। विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्।

प्रादेशनं निर्वपणमपवर्जनमंहतिः॥ उत्सर्गोऽस्य मृतार्थं तदहे दानं त्रिषु स्यादौर्ध्वदेहिकं।

पितृदानं निवापः स्यात्। श्राद्धं तत्कर्म शास्त्रतः। अन्वाहार्यं मासिके। अंशोऽष्टमोऽह्नः कु

तपोऽस्त्रियाम्। पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा॥ सनिस्त्वध्येषणा याच्ञा

भिशस्तिर्याचनार्थना॥ षट् तु त्रिषु अर्घ्यमर्घार्थे। पाद्यं पादाय वारिणि। क्रमादाति

थ्यातिथेये अतिथ्यर्थेऽत्र साधुनि। स्युरावेशिक आगन्तुरतिथिर्ना गृहागते। प्राघूर्णिक

प्राघुणकः। अभ्युत्थानं तु गौरवम्। पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः

वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्॥ परिव्रज्या स्यात् भैक्षं कस्माविशाविका

व्रज्याटाट्या पर्यटनं। चर्या त्वीर्यापथस्थितिः। उपस्पर्शस्त्वाचमनम्। अथ मौनमभा

षीणाम् २ प्राचेतसश्चादिकविः स्यान्मैत्रावरुणश्च सः वाल्मीकिश्च ४ अथ गाधेयो विश्वा
मित्रश्च कौशिकः २ व्यासो द्वैपायनः पाराशर्यः सत्यवतीसुतः ४ आनुपूर्व्यं स्त्रियां वावृ
त्परिपाटीअनुक्रमः पर्यायश्च ५ अतिपातस्तु विपर्यय उपात्ययः २ क्रमोल्लंघनमतिक्रम
श्च नियमो व्रतमस्त्री २ तच्चोपवासादि पुण्यकम् १ औपवस्तस्तूपवासः २ विवेकः पृथगा
त्मता २ स्याद्ब्रह्मवर्चसं वृत्ताध्ययनर्द्धिः २ अथांजलिः १ पाठे ब्रह्मांजलिः १ पाठे विप्रुषो ब्र
ह्मबिंदवः १ ध्यानयोगासने ब्रह्मासनम् १ कल्पे विधिक्रमौ मुख्यः स्यात्प्रथमः कल्प १
अनुकल्पस्ततोऽधमः १ संस्कारपूर्वं ग्रहणं स्यादुपाकरणं श्रुतेः १ समे तु पादग्रहणम
भिवादनमित्युभे २ भिक्षुः परिव्राट्कर्मंदी पाराशर्यपि मस्करी ५ तपस्वी तापसः पारिकां
क्षी २ वाचंयमो मुनिः २ तपःक्लेशसहो दांतः २ वर्णिनो ब्रह्मचारिणः २ ऋषयः सत्यव
चसः २ स्नातकस्त्वाप्लुतव्रती २ ये निर्जितेंद्रियग्रामा यतिनो यतयश्च ते २ यः स्थंडिलेव्र
तवशाच्छेते स्थंडिलशाय्यसौ स्थांडिलश्च २ अथ विरजस्तमसः स्युर्द्वयातिगाः २ पवि
त्रः प्रयतः पूतः ३ पाखंडाः सर्वलिंगिनः २ पालाशो दंड आषाढः

कुले १ तां भक्त्वा वैणवकः १ प्रतीकमंडलुः कुंडी १ व्रतिना मासनं बृसी १ अजिनं चर्म कृत्तिः स्त्री
भैक्षं भिक्षाकदंबकम् १ स्वाध्यायः स्याज्जपः १ सुत्याभिषवः सवनं च सा १ सर्वैनसाम
पध्वंसि जप्यं त्रिष्वघमर्षणम् १ दर्शश्च पौर्णमासश्च यागौ पक्षान्तयोः पृथक् १ शरीरसा
धनापेक्षं नित्यं यत्कर्म तद्यमः १ नियमस्तत्तु यत्कर्म नित्यमागन्तुसाधनं १ शैवशैवाधे
स्रोतसिकः सिद्धान्ती शुद्धमार्गिकः पांचालिकः पाशुपतो नाकुलोऽथ महाव्रती क
पाली सोमसिद्धान्ती लाकुलिकः स्याद्विशेषदृक् वाममलोद्भवमार्गः स्यात्त्रिकवेदी षडर्धिकः
पूर्वाम्नायी महामार्गी भैरवी दक्षिणागामी शाक्तो वामस्रोतसिकः कौलश्चान्वयिकः
समौ पंचाप्यनेसात्वतस्तु वैष्णवः पांचरात्रिकः रक्तांबरो भदंतश्च शाक्यः श्रमणो भिद
कः भिक्षुः श्वेतः श्वेतपटः तपस्वी दिगंबरः नग्नाटः श्रावकः क्षपणको निर्ग्रन्थो जीवजीव
कौ तौरंतभद्राकरणं मुंडनं वपनं त्रिषु ५ कन्थापटीच कौपीनं शाटीच स्त्री तिलव्रतः ५
उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे २ प्राचीनावीतमन्यस्मिन् १ निवीतं कंठलंबितं १
अंगुल्यग्रे तीर्थं दैवं १ स्वल्पांगुल्योर्मूले कायं १ मध्येंगुष्ठांगुल्योः पित्र्यं १ मूले त्वंगुष्ठस्य

ब्रह्मत्वं स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि २ देवभूयादिकं तद्वत् २ कृच्छ्रं सांतपनादि
कम् संन्यासवत्यनशने पुमान्प्रायः १ अथ वीरहा नष्टाग्निः २ कुहना लोभान्मिथ्येर्यापथ
कल्पना १ व्रात्यः संस्कारहीनः स्यात् २ अस्वाध्यायो निराकृतिः २ धर्मध्वजी लिंगवृत्तिः
अवकीर्णी क्षतव्रतः १ सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च अंशुमानभिनिर्मुक्ता
भ्युदितौ च यथाक्रमम् २ परिवेत्तानुजेनूढे ज्येष्ठे दारपरिग्रहात् १ परिवित्तिस्तु तज्ज्याया
न् १ विवाहोपयमौ समौ तथा परिणयोद्वाहोपयामाः पाणिपीडनम् ४ व्यवायो ग्रा
म्यधर्मो मैथुनं निधुवनं रतम् ५ सुरतं मोहनं संप्रयोगश्च त्रिवर्गो धर्मकामार्थैः १ च
तुर्वर्गः समोक्षकैः १ सबलैस्तैश्चतुर्भद्रम् १ जन्याः स्निग्धा वरस्य ये १ इत्यमरकोशे द्वि
तीयकांडे ब्रह्मवर्गः सप्तमः ७ मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् ५ रा
जा राट् पार्थिव क्ष्माभृन्नृपभूपमहीक्षितः ७ राजा तु प्रणताशेषसामंतः स्यादधीश्वरः
चक्रवर्ती सार्वभौमः २ रामो दाशरथी रावणारिः काकुत्स्थराघवौ सौमित्रिर्लक्ष्मणः १
लंकापतिः पौलस्त्यो रावणः दशास्यः ४ अथेंद्रजिन्मेघनादो मंदोदरीसुतः २ किंकरा

ियमसुग्रीवौ २ हनूमान्मारुतात्मजे २ द्रोणराड्जराड्नौ २ अजातशत्रुः शल्यारिर्धर्म
पुत्रो युधिष्ठिरः ४ राधेयो गांधिपः कर्णो २ भीमसेनो हिडिम्बभित् मारुतिः कीचका
रातिर्बकवैरी वृकोदरः ७ धनंजयोऽर्जुनः पार्थः विजयः शक्रनंदनः गांडीवी फल्गुनः
सव्यसाची मध्यमपांडवः जिष्णुः किरीटी बीभत्सुः श्वेतवाजी कपिध्वजः १४ कृष्णाकंतौ
नकुल्मातृ पांचाली याज्ञसेन्यपि द्रौपदी विक्रमादित्यः साहसांकः शकांतकः ३ शूद्रक
स्त्वग्निमित्रो नाहालः स्यात्सालवाहनः ४ वैरोचनिर्बलिः २ कार्तवीर्योऽर्जुनः सहस्रदोः ३
नृपोऽस्यामंडलेश्वरः २ येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः शास्ति यश्चाज्ञया राज्ञः स स
म्राट् २ अथ राजकं राजन्यकं च नृपतिक्षत्रियाणां गणे क्रमात् २ मंत्री धीसचिवोऽमात्यः
[illegible]त्यामात्यापि कोऽपि अन्यः कर्मसचिवात्ततः ४ महामात्राः प्रधानानि २ पुरोधास्तु पुरो
हितः २ द्रष्टरि व्यवहाराणां प्राड्विवाकाक्षदर्शकौ २ धर्माधिकरणिकग्रामपाटलि
कस्थ शतीहारो द्वारपालद्वास्थद्वास्थितदर्शकाः ५ देशीयो वाष्रिकोऽवेशी २ उद्दारकस्थ
रक्षिवर्गस्त्वनीकस्थः २ अध्यक्षाधिकृतौ समौ स्थायुकोऽधिकृतो ग्रामे १ गोपो ग्रामे १

अ
को
५५

39

षुभूरिषु १ भौतिकः कनकाध्यक्षे १ रूप्याध्यक्षस्तु नैष्किकः २ अंतःपुरे त्वधिकृतः स्यादंत
र्वंशिको जनः १ सौविदल्लाः कंचुकिनः स्थापत्याः सौविदाश्च ते ४ षंढो वर्षवरस्तुल्यौ २
षंढश्च सेवकार्थ्यनुजीविनः ३ विषयानंतरो राजा शत्रुः १ मित्रमतः परं १ उदासीनः
परतरः १ तटस्थश्च पार्ष्णिग्राहस्तु पृष्ठतः १ रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः द्वि
ड्विपक्षाहितामित्रदस्युशात्रवशत्रवः अभिघातिपरारातिप्रत्यर्थिपरिपंथिनः १९ अ
नुव्यासहृत्सहेषिणि निर्गोत्रसपत्नस्त्रीकिनश्च वयस्यः स्निग्धः सवयाः २ अथ मित्रं सखा सु
हृत् ३ सख्यं साप्तपदीनं स्यात् १ सौहार्दं सौहृदं सौहृद्यं सख्यं च अनुरोधोऽनुवर्तनं
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः चारश्च गूढपुरुषः ७ आप्तः प्रत्ययितस्त्रिषु २
सांवत्सरो ज्योतिषिको दैवज्ञगणकावपि स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तांतिका अ
पि ८ तांत्रिको ज्ञातसिद्धांतः २ सत्री गृहपतिः समौ २ लिपिकारोऽक्षरचणोऽक्षरचुंचुश्च
लेखके ४ लिखिताक्षरविन्यासे लिपिर्लिबिरुभे स्त्रियौ २ स्यात्संदेशहरो दूतः २ दूत्यं त
द्भावकर्मणी १ अध्वनीनोऽध्वगोऽध्वन्यः पांथः पथिक इत्यपि ५ स्वाम्यमात्यसुहृत्कोशराष्ट्रदु

अ
को
५.
60

व यौतकादि तु यद्देयं सुदायो हरणं च तत् २ तत्कालस्तु तदात्वं स्यात् २ स्यादायतिःकालउत्तरः
सांदृष्टिकं फलं सद्य उदर्कः फलमुत्तरं २ अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम् २ म
हीभुजामहिभयं स्वपक्षप्रभवं भयम् २ प्रक्रिया त्वधिकारः स्यात् २ चामरं तु प्रकीर्णकं
नृपासनं तु यद्भद्रासनं २ सिंहासनं तु तद्धैमं २ छत्रं त्वातपत्रं २ राज्ञस्तु नृपलक्ष्म तत् २ भ
द्रकुम्भः पूर्णकुम्भः २ भृंगारः कनकालुका २ निवेशः शिबिरं षण्ढे २ सज्जनं त्वावारः सैन्या
वासश्च सज्जनं तूपरक्षणम् २ गुल्मकश्च हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयम्
दंती दंतावलो हस्ती द्विरदोनेकपो द्विपः मतंगजो गजो नागः कुंजरो वारणः करी
इभः स्तंबेरमः पद्मी १५ सामजः सिंधुरः कुंभीव यूथनाथस्तु यूथपः २ मदोत्कटो मद
कलः २ कलभः करिशावकः २ प्रभिन्नो गर्जितो मत्तो २ समावुद्वांतनिर्मदौ २ हास्ति
कं गजता वृंदे २ करिणी धेनुका वशा २ गंडः कटो मदो दानं २ दंतिनो वमथुः करशी
करः २ कुंभौ तु पिंडौ शिरसः २ तयोर्मध्ये विदुः पुमान् २ अवग्रहो ललाटं स्यात् २ ईषिका
त्वक्षिकूटकम् २ अपांगदेशो निर्याणं २ कर्णमूलं तु चूलिका २ अधः कुंभस्य वाहित्थं :

५.

प्रतिमानं भागोऽस्य च १ आसनं स्कन्धदेशः स्यात् पद्मकं बिन्दुजालकम् १ पक्षभागः पार्श्व-

भागो १ दन्तभागस्तु योऽग्रतः १ द्वौ पूर्वपश्चाज्जंघादिदेशौ गात्रावरे क्रमात् १ तोत्रं वैणुकं

आलानं बन्धस्तम्भे १ अथ शृङ्खले अन्दुको निगडोऽस्त्री स्यात् २ अङ्कुशोऽस्त्री सृणिः स्त्रियाम्

दूष्याकक्ष्यावरत्रा स्यात् २ कल्पना सज्जना समे १ प्रवेण्यास्तरवर्णाः परिस्तोमः कु-

थो द्वयोः ५ वीतं त्वसारं हस्त्यश्वं १ वारी तु गजबन्धनी १ घोटके वीतितुरगतुरंगाश्व-

तुरंगमाः वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः १२ आजानेयाः कुलीनाः स्युः २ विनी-

ताः साधुवाहिनः २ वनायुजाः पारसीकाः काम्बोजाः बाह्लिका हयाः ४ ययुरश्व

अश्वमेधीयः १ जवनस्तु जवाधिकः १ पृष्ठ्यः स्थौरी १ सितः कर्कः १ २

रथ्यो वोढा रथस्य यः १ बालः किशोरः वाम्यश्वा वडवा २ वाडवं गणे १ त्रिष्वाश्वीनं यदश्वे-

न दिनेनैकेन गम्यते १ कश्यं तु मध्यमश्वानां १ हेषा ह्रेषा च निस्वनः १ निगालस्तु गलो-

द्देशः १ वृन्दे त्वश्वीयमाश्ववत् १ पर्याणं पल्ययनकं १ वल्गारश्मिकशाः समाः १ आ-

स्कन्दितं धौरितकं वल्गितं रेचितं प्लुतम् गतयोऽमूः पञ्च धाराः ५ घोणा तु प्रोथमस्त्रियाम् २

कविका तु खलीनो ना १ शफं क्लीबे खुरः पुमान् १ पुच्छोऽस्त्री लूमलाङ्गूले २ वालहस्तश्च
वालधिः २ त्रिषूपावृत्तलुठितौ परावृत्ते मुहुर्भुवि १ याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो र
थः ४ असौ पुष्परथश्चक्रयानं न समराय यत् १ कर्णीरथः प्रवहणं डयनं च समं त्रयम्
क्लीबेऽनः शकटोऽस्त्री स्यात् १ गन्त्री कम्बलिवाह्यकम् १ शिबिका याप्ययानं स्यात् २ दो
ला प्रेङ्खादिकाः स्त्रियाम् १ उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्मावृते रथे १ पाण्डुकम्बलसंवीतः
स्यन्दनः पाण्डुकम्बली १ योग्यो रथो वैनयिकश्चाथ पुष्यः पारियात्रिकः ४ रथे काम्बलवा
स्त्राद्याः कम्बलादिभिरावृते १ अस्त्री चूलावचूलाख्यो ध्वजो ना ध्वजकेतौ २ त्रिषु
द्वैपादयो रथ्या रथकड्या रथव्रजे २ धूः स्त्री क्लीबे यानमुखं १ स्याद्रथाङ्गमपस्करः २
चक्रं रथाङ्गं १ तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान् १ पिण्डिका नाभिः २ अक्षाग्रकीलके
तु द्वयोरणिः १ रथगुप्तिर्वरूथो ना २ कूबरस्तु युगन्धरः १ अनुकर्षो दार्वधःस्थम् १
प्रासङ्गो ना युगाद्युगः १ सर्वं स्याद्वाहनं यानं युग्यं पत्त्रं च धोरणम् ५ ~~प्रासङ्गो ना युगाद्युगः~~
~~रथकाद्यो दिनस्थानेषु~~ परम्परावाहनं यत्तद्वैनीतकमस्त्रियाम् १ आधोरणा हस्तिप

काहस्त्यारोहानिषादिनः ४ नियंताप्राजितायंतासूतः क्षत्ताचसारथिः सव्येष्ठद
क्षिणस्थौचसंज्ञारथकुटुंबिनः ८ रथिनःस्यंदनारोहाः २ अश्वारोहास्तुसादिनः २ भटा
योधाश्चयोद्धारः २ सेनारक्षास्तुसैनिकाः सेनायांसमवेतायेसैन्यास्तेसैनिकाश्चते
बलिनोयेसहस्रेणसाहस्रास्तेसहस्रिणः २ परिधिस्थःपरिचरः २ सेनानीर्वाहिनी
पतिः २ कंचुकोवारवाणोस्त्री २ यत्तुमध्येसकंचुकाः बध्नंतितत्सारसनमधिकांगः २
अथशीर्षकंशीर्षण्यंचशिरस्त्रेच २ तनुत्रंवर्मदंशनं उरश्छदःकंकटकोजागरःक
वचोस्त्रियाम् २ आमुक्तःप्रतिमुक्तश्चपिनद्धश्चापिनद्धवत् ४ सन्नद्धोवर्मितःसज्जोदं
शितोव्यूढकंकटः ४ त्रिष्वामुक्तादयःवर्मभृतांकावचिकंगणे २ पदातिपत्तिपदगप
दातिकपदाजयः पद्गश्चपदिकश्च २ अथपादातंपत्तिसंहतिः २ शस्त्राजीवीकांडपृष्ठा
युधीयायुधिकाःसमाः ४ कृतहस्तःसुप्रयोगविशिखःकृतपुंखवत् २ अपराद्धपृषत्
कोसौलक्ष्याद्यश्च्युतसायकः धन्वीधनुष्मान्धानुष्कोनिषंगस्त्रीधनुर्धरः ४ स्यात्कांड
वांस्तुकांडीरः शाक्तीकःशक्तिहेतिकः २ याष्टीकपारश्वधिकौयष्टिपरश्वधहेतिकौ

अ
को
५२

नैस्त्रिंशिकोसिहेतिः स्यात् २ समौ प्रासिककौंतिकौ २ चर्मी फलकपाणिः स्यात् २ पताकी वै
जयंतिकः २ अनुप्लवः सहायश्चानुचरोभिसरः समाः ४ पुरोगाग्रेसरप्रष्ठाग्रतःसरपुरःसराः
पुरोगमः पुरोगामी ७ मंदगामी तु मंथरः जंघालोतिजवस्तुल्यौ २ जंघाकरिकजांघिकौ २
तरस्वी त्वरितो वेगी प्रजवी जवनो जवः ६ जय्यो यः शक्यते जेतुं १ जेयो जेतव्यमात्रके १ जैत्र
स्तु जेता २ यो गच्छत्यलं विद्विषतः प्रति सोभ्यमित्रोभ्यमित्रीयोप्यभ्यमित्रीण इत्यपि ३ ऊर्ज
स्वलः स्यादूर्जस्वी य ऊर्जातिशयान्वितः २ स्यादुरस्वानुरसिलः २ रथिको रथिनो रथी ३
कामंगाम्यनुकामीनोपि २ अत्यंतीनस्तथा भृशम् १ शूरो वीरश्च विक्रांतो ३ जेता जिष्णु
श्च जित्वरः ३ सांयुगीनो रणे साधुः १ शस्त्राजीवादयस्त्रिषु ध्वजिनी वाहिनी सेना पृतनानी
किनी चमूः वरूथिनी ७ बलं सैन्यं चक्रं चानीकमस्त्रियाम् ५ व्यूहस्तु बलविन्यासः १ भेदा
दंडादयो युधि ४ प्रत्यासारो व्यूहपार्ष्णिः २ सैन्यपृष्ठे प्रतिग्रहः १ एकेभैकरथा त्र्यश्वा पत्तिः
पंचपदातिका १ पत्त्यंगैस्त्रिगुणैः सर्वैः क्रमादाख्या यथोत्तरं सेनामुखं १ गुल्मगणौ २
